

# ।। ईशावास्योपनिषत् ।।

(पदविभागः पदपरिचयः, पदार्थः अन्वयः व्याकरणविषयाः सहितम्)

Prepared by: **Brahmachari Saravanan**

॥ईशावास्योपनिषत् ॥

ईशा वास्यमिदं सर्वं यत्किं च जगत्यां जगत् ।

तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद्धनम् ॥1 ॥

**पदविभागः**

ईशा वास्यम् इदं सर्वं यत् किम् च जगत्यां जगत् तेन त्यक्तेन भुञ्जीथाः मा अगृधः

कस्यस्वित् धनम्

**पदपरिचयः**

ईशा - शकार पु तृ एक (ईश्)

वास्यम् - अकार नपु प्र एक

इदं - मकार नपु प्र एक

सर्वं - अकार नपु प्र एक (सर्वनाम)

यत् - दकार नपु प्र एक

किम् - मकार नपु प्र एक

च - अव्ययम्

जगत्यां - ईकार स्त्री स एक (जगती)

जगत् - तकार पु प्र एक

तेन - दकार पु तृ एक

Downloaded from **www.omkaravidya.com**

त्यक्तेन - अकार पु तृ एक

भुञ्जीथाः - भुज् धातोः विधिलिङ् मपु एक

मा - अव्ययम्

अगृधः - गृध् धातोः लुङ् मपु एक

कस्यस्वित् - अव्ययम्

धनम् - अकार नपु द्वि एक

पदार्थः

ईशा - परमेश्वरेण

वास्यम् - व्याप्तम्

इदं - इदम्

सर्वं - अखिलम्

जगत्यां - पृथिव्याम्

जगत् - जगत्

त्यक्तेन - त्यागेन

भुञ्जीथाः - पालयेथाः

मा - मा

अगृधः - अपहर्तुमिच्छा

कस्यस्वित् - केषांचित्

धनम् - वित्तम्

अन्वयः

Downloaded from **www.omkaravidya.com**

जगत्यां यत् किम् च जगत् इदं सर्वं ईशा वास्यम् (अस्ति) । तेन त्यक्तेन भुञ्जीथाः ।

कस्यस्वित् धनम् मा अगृधः ।

## व्याकरणम्

सन्धिः

भुञ्जीथाः + मा - विसर्गलोपः

मा + अगृधः - सवर्णदीर्घसन्धिः

कस्यस्वित् + धनम् - जश्त्वसन्धिः

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतंसमाः ।

एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥२॥

## पदविभागः

कुर्वन् एव इह कर्माणि जिजीविषेत् शतं समाः एवं त्वयि न अन्यथा इतः अस्ति न कर्म

लिप्यते नरे

## पदपरिचयः

कुर्वन् - तकार पु प्र एक

कर्माणि - अकार नपु द्वि बहु

जिजीविषेत् - जीव् धातोः विधि प्रपु एक + णिच्

शतं - अकार नपु प्र एक

समाः - अकार पु प्र बहु

Downloaded from **www.omkaravidya.com**

त्वयि - दकार नि स एक

अन्यथा - अव्ययम्

कर्म - नकार पु प्र एक

लिप्यते - लट् कर्मणि प्रपु एक

नरे - अकार पु स एक

**पदार्थः**

कुर्वन् - अनुष्ठित्वा

कर्माणि - वैदीककर्माणि

जिजीविषेत् - जीवितुम् इच्छति

शतम् समाः - शतसम्वत्सराः

एवं - एवमिच्छन्

त्वयि - तुभ्यम्

अन्यथा - इतरता

कर्म - कर्म

लिप्यते - बध्यते

नरे - पुरुषे

**अन्वयः**

इह (अस्मिन् लोके) कर्माणि कुर्वन् एव शतं समाः जिजीविषेत् एवं नरे त्वयि इतः

अन्यथा (मार्ग:) न अस्ति । कर्म न लिप्यते ।

Downloaded from **www.omkaravidya.com**

## व्याकरणम्

### सन्धिः

कुर्वन् + एव - अनुनासिकासन्धिः

एव + इह - गुणसन्धिः

जिजीविषेत् + शतं - श्चुत्वसन्धिः छत्वसन्धिः

न + अन्यथा - सवर्णदीर्घसन्धिः

अन्यथा + इतः - गुणसन्धिः

इतः + अस्ति - विसर्गउकारः पूर्वरूपसन्धिः

असूर्या नाम ते लोका अन्धेन तमसावृताः ।

तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ॥३॥

## पदविभागः

असूर्या नाम ते लोका अन्धेन तमसा आवृताः तान् ते प्रेत्य अभिगच्छन्ति ये के च

आत्महनः जनाः

## पदपरिचयः

असूर्या - आकार स्त्री प्र एक

नाम - नकार पु प्र एक

ते - दकार पु प्र बहु

लोकाः - अकार पु प्र बहु

Downloaded from **www.omkaravidya.com**

अन्धेन - अकार पु तृ एक

तमसा - सकार नपु तृ एक

आवृताः - अकार पु प्र बहु

तान् - दकार पु द्वि बहु

ते - दकार पु प्र बहु

प्रेत्य - ल्यबन्तम्

अभिगच्छन्ति - अभि + गम् धातोः प्रपु बहु

ये - दकार पु प्र बहु

के - दकार पु प्र बहु

आत्महनः - नकार पु प्र बहु

जनाः - अकार पु प्र बहु

पदार्थः

असूर्या - असूर्या

नाम - नाम

ते - जनाः

लोकाः - शरीराणि

अन्धेन - अज्ञानेन

तमसा - तमसा

आवृताः - आच्छादिताः

तान् - तान् लोकान्

Downloaded from **www.omkaravidya.com**

ते - अविद्वाम्सः

प्रेत्य - मरणानन्तरम्

अभिगच्छन्ति - प्राप्नुवन्ति

ये - ये

के - के

आत्महनः - ये आत्मानं हन्ति

जनाः जनाः

अन्वयः

आत्महनः जनाः ये के च ते असूर्या नाम अन्धेन तमसा आवृताः ते लोकाः (सन्ति)

तान् प्रेत्य अभिगच्छन्ति ।

व्याकरणम्

सन्धिः

तमसा + आवृताः - सवर्णदीर्घसन्धिः

तान् + ते - सत्वसन्धिः

प्रेत्य + अभिगच्छन्ति - सवर्णदीर्घसन्धिः

च + आत्महनः - सवर्णदीर्घसन्धिः

आत्महनः + जनाः - विसर्गउकारः

अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन्पूर्वमर्षत् ।

Downloaded from **www.omkaravidya.com**

तद्धावतोऽन्यानत्येति तिष्ठंस्तस्मिन्नपो मातरिश्वा दधाति ॥ ४ ॥

पदविभागः

अनेजत् एकं मनसः जवीयः न एनत् देवाः आप्नुवन् पूर्वम् अर्षत् तत् धावतः अन्यान्

अत्येति तिष्ठन् तस्मिन् अपः मातरिश्वा दधाति

पदपरिचयः

अनेजत् - अन् + तकार नपु प्र एक

एकं - अकार नपु प्र एक

मनसः - सकार नपु प एक

जवीयः - अकार पु प्र एक

एनत् - अकार नपु प्र एक

देवाः - अकार पु प्र बहु

आप्नुवन् - तकार पु प्र एक

पूर्वम् - अव्ययम्

अर्षत् - तकार पु प्र एक

तत् - दकार नपु प्र एक

धावतः - तकार पु प्र बहु

अन्यान् - अकार पु द्वि बहु

अत्येति - लट् प्रपु एक

तिष्ठत् - तकार नपु प्र एक

Downloaded from **www.omkaravidya.com**

तस्मिन् - दकार पु स बहु

अपः - अकार पु प्र एक

मातरिश्वा - नकार पु प्र एक

दधाति - लट् प्रपु एक

पदार्थः

अनेजत् - न कम्पते

एकं - सर्वभूतेषु एकम्

मनसः मनसः

जवीयः - जववत्तरः

एनत् - आत्मतत्त्वम्

देवाः - पञ्चेन्द्रियाणि

आप्नुवन् - प्राप्नुवन्

पूर्वम् - पुरा

अर्षत् - गतम्

तत् - आत्मतत्त्वम्

धावतः - द्रुयतं गच्छतः

अन्यान् - इन्द्रियाणि

अत्येति - धरति

तिष्ठत् - अचलत्

तस्मिन् - तस्मिन्

Downloaded from **www.omkaravidya.com**

अपः - कर्माणि

मातरिश्वा - हिरण्यगर्भः

दधाति - विभज्यति

## अन्वयः

(आत्मतत्त्वम्) अनेजत् । (आत्मतत्त्वम्) एकं । (आत्मतत्त्वम्) मनसः जवीयः । एनत् देवाः न आप्नुवन् ।

(यतः) (आत्मतत्त्वम्) पूर्वम् अर्षत् । धावतः अन्यान् तत् (आत्मतत्त्वम्) अत्येति (सति) तिष्ठत् । तस्मिन् मातरिश्वा अपः

दधाति ।

## व्याकरणम्

सन्धिः

अनेजत् + एकं - जश्त्वसन्धिः

.मनसः + जवीयः - विसर्गउकारः

न + एनत् - वृद्धिसन्धिः

एनत् + देवाः - जश्त्वसन्धिः

तत् + धावतः - जश्त्वसन्धिः

धावतः + अन्यान् - विसर्गउकारः पूर्वरूपसन्धिः

तस्मिन् + अपः - अनुनासिकासन्धिः

तदेजति तन्नैजति तद्दूरे तद्वन्तिके ।

तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः ॥५॥

Downloaded from **www.omkaravidya.com**

पदविभागः

तत् एजति तत् न एजति तत् दूरे तत् अन्तिके तत् अन्तः अस्य सर्वस्य तत् उ सर्वस्य

अस्य बाह्यतः

पदपरिचयः

तत् - दकार नपु प्र एक

एजति - लट् प्रपु एक

तत् - दकार नपु प्र एक

एजति - लट् प्रपु एक

तत्-दकार नपु प्र एक

दूरे - अव्ययम्

तत्-दकार नपु प्र एक

अन्तिके - अव्ययम्

तत्-दकार नपु प्र एक

अन्तः - अव्ययम्

अस्य - दकार पु ष एक

सर्वस्य - दकार पु ष एक

तत् - दकार नपु प्र एक

उ - अव्ययम्

सर्वस्य - दकार पु ष एक

Downloaded from **www.omkaravidya.com**

अस्य - दकार पु ष एक

बाह्यतः - अव्ययम्

**पदार्थः**

तत् - आत्मतत्त्वम्

एजति - चलति

तत् - - आत्मतत्त्वम्

न एजति - न चलति

तत् - आत्मतत्त्वम्

दूरे - दूरे

तत् - आत्मतत्त्वम्

अन्तिके - समीपे

तत् - आत्मतत्त्वम्

अन्तः - बहिः

अस्य - अस्य

सर्वस्य - सकलस्य

तत् - आत्मतत्त्वम्

सर्वस्य - सर्वस्य

अस्य - अस्य

बाह्यतः - बाह्यतः

**अन्वयः**

Downloaded from **www.omkaravidya.com**

तत् (आत्मतत्त्वम्) एजति । तत् (आत्मतत्त्वम्) न एजति । तत् दूरे (अस्ति) । तत् उ अन्तिके (अस्ति) ।

तत् अस्य सर्वस्य अन्तः (अस्ति) । तत् उ अस्य सर्वस्य बाह्यतः (अस्ति) ।

## व्याकरणम्

सन्धिः

तत् + एजति - जश्त्वसन्धिः

तत् + न - अनुनासिकासन्धिः

न + एजति - वृद्धिसन्धिः

तत् + दूरे - जश्त्वसन्धिः

तत् + अन्तिके - जश्त्वसन्धिः

तत् + अन्तः - जश्त्वसन्धिः

अन्तः + अस्य - विसर्गरेफः

तत् + उ - जश्त्वसन्धिः

सर्वस्य + अस्य - सवर्णदीर्घसन्धिः

यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति ।

सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ॥ ६॥

## पदविभागः

Downloaded from **www.omkaravidya.com**

यः तु सर्वाणि भूतानि आत्मनि एव अनुपश्यति सर्वभूतेषु च आत्मानं ततः न

विजुगुप्सते

**पदपरिचयः**

यः - दकार पु प्र एक

तु - अव्ययम्

सर्वाणि - अकार नपु प्र बहु

भूतानि - अकार नपु प्र बहु

आत्मनि - नकार पु स एक

एव - अव्ययम्

अनुपश्यति - अनु + दृश् धातोः लट् लकारः प्रपु एक

सर्वभूतेषु - अकार नपु स बहु

आत्मानं - नकार पु द्वि एक

ततः - अव्ययम्

न - अव्ययम्

विजुगुप्सते - वि + गुप् धातोः लट् प्रपु एक

**पदार्थः**

यः- यः मनुष्यः

सर्वाणि - सकलानि

भूतानि - प्राणिनः

Downloaded from **www.omkaravidya.com**

आत्मनि - आत्मनि

अनुपश्यति - पश्यति

सर्वभूतेषु - सकलभूतेषु

आत्मानं - स्वं

ततः - तेन कारणेन

न विजुगुप्सते - न निन्दां करोति

## अन्वयः

यः तु सर्वाणि भूतानि आत्मनि एव अनुपश्यति सर्वभूतेषु च आत्मानं (अनुपश्यति)

(सः) ततः (तेन ज्ञान प्राप्तेन) न विजुगुप्सते ।

## व्याकरणम्

सन्धिः

यः + तु - विसर्गसकारः

आत्मनि + एव - यण्सन्धिः

एव + अनुपश्यति - सवर्णदीर्घसन्धिः

च + आत्मानम् - सवर्णदीर्घसन्धि

ततः + न - विसर्गउकारः

यस्मिन्सर्वाणि भूतानि आत्मैवाभूद्विजानतः ।

तत्र को मोहः कः शोकः एकत्वमनुपश्यतः ॥७॥

Downloaded from **www.omkaravidya.com**

पदविभागः

यस्मिन् सर्वाणि भूतानि आत्मा एव अभूत् विजानतः तत्र कः मोहः कः शोकः एकत्वम्

अनुपश्यतः

पदपरिचयः

यस्मिन् - दकार पु स एक

सर्वाणि - अकार नपु प्र बहु

भूतानि - अकार नपु प्र बहु

आत्मा - नकार पु प्र एक

एव - अव्ययम्

अभूत् - लुङ् प्रपु एक

विजानतः - तकार पु प्र एक

तत्र - अव्ययम्

कः - दकार पु प्र एक

मोहः - अकार पु प्र एक

कः - दकार पु प्र एक

शोकः - अकार पु प्र एक

एकत्वम् - अकार नपु प्र एक

अनुपश्यतः - तकार पु प्र एक

पदार्थः

Downloaded from **www.omkaravidya.com**

यस्मिन् - यस्मिन् काले

सर्वाणि - सकलानि

भूतानि - प्राणिनः

आत्मा आत्मा

एव - एव

अभूत् - सम्वृत्तः

विजानतः - जानतः

तत्र - तस्मिन्काले

कः कः

मोहः - मोहः

कः कः

शोकः - शोकः

एकत्वम् - विशुद्धम्

अनुपश्यतः - पश्यतः

## अन्वयः

एकत्वम् अनुपश्यतः विजानतः यस्मिन् सर्वाणि भूतानि आत्मा एव अभूत् तत्र मोहः

कः शोकः कः ? ।

## व्याकरणम्

सन्धिः

Downloaded from **www.omkaravidya.com**

आत्मा + एव - वृद्धिसन्धिः

एव + अभूत् - सवर्णदीर्घसन्धिः

अभूत् + विजानतः - जश्त्वसन्धिः

कः + मोहः - विसर्गउकारः

स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम् ।

कविर्मनीषी परिभूः स्वयम्भूर्याथातथ्यतोऽर्थान्व्यदधाच्छाश्वतीभ्यः समाभ्यः ॥८॥

पदविभागः

सः पर्यगात् शुक्रम् अकायम् अव्रणम् अस्नाविरं शुद्धम् अपापविद्धम्

कविः मनीषी परिभूः स्वयम्भूः याथातथ्यतः अर्थान् व्यदधात् शाश्वतीभ्यः समाभ्यः

पदपरिचयः

सः - दकार पु प्र एक

पर्यगात् - अकार पु प एक

शुक्रम् - अकार नपु प्र एक

अकायम् - अकार नपु प्र एक

अव्रणम् - अकार नपु प्र एक

अस्नाविरं - अकार नपु प्र एक

शुद्धम् - अकार नपु प्र एक

अपापविद्धम् - अकार नपु प्र एक

Downloaded from **www.omkaravidya.com**

कविः - इकार पु प्र एक

मनीषी - नकार पु प्र एक

परिभूः - ऊकार पु प्र एक

स्वयम्भूः - ऊकार पु प्र एक

याथातथ्यतः - अकार नपु प एक

अर्थान् - अकार पु द्वि बहु

व्यदधात् - वि + धा लङ् प्र एक

शाश्वतीभ्यः - ईकार स्त्री तृ बहु

समाभ्यः - आकार स्त्री तृ बहु

पदार्थः

सः - आत्मा

पर्यगात् - सर्वगतः

शुक्रम् - शुभ्रम्

अकायम् - अशरीरम्

अव्रणम् - अक्षतम्

अस्नाविरं - स्नाविररहितम्

शुद्धम् - निर्मलम्

अपापविद्धम् - पापवर्जितम्

कविः - सर्वदृक्

मनीषी - सर्वज्ञः

Downloaded from **www.omkaravidya.com**

परिभूः - सर्वेषाम् उपरि इति

स्वयम्भूः - स्वयमेव भवति इति

याथातथ्यतः - यथातथाभावात्

अर्थान् - कर्तव्यपदार्थान्

व्यदधात् - विहितवान्

शाश्वतीभ्यः - नित्याभ्यः

समाभ्यः - प्रजापतिभ्यः

अन्वयः

सः पर्यगात् । (सः) शुक्रम् अकायम् अव्रणम् अस्नाविरं शुद्धम् अपापविद्धम्

कविः मनीषी परिभूः स्वयम्भूः याथातथ्यतः अर्थान् शाश्वतीभ्यः समाभ्यः व्यदधात् ।

व्याकरणम्

सन्धिः

सः + पर्यगात् - विसर्गलोपः

पर्यगात् + शुक्रम् - श्चुत्वसन्धिः छत्वसन्धिः

कविः + मनीषी - विसर्गरफः

स्वयम्भूः + याथातथ्यतः - विसर्गरफः

याथातथ्यतः + अर्थान् - विसर्गउकारः पूर्वरूसन्धिः

व्यदधात् + शाश्वतीभ्यः - श्चुत्वसन्धिः छत्वसन्धिः

Downloaded from **www.omkaravidya.com**

अन्धं तमः प्रविशन्ति ये अविद्यामुपासते ।

ततो भूय इव ते तमो य उ विद्यायां रताः ॥ ९॥

पदविभागः

अन्धं तमः प्रविशन्ति ये अविद्याम् उपासते ततः भूय इव ते तमो य उ विद्यायां रताः

पदपरिचयः

अन्धं - अकार पु द्वि एक

तमः - सकार नपु द्वि एक

प्रविशन्ति - लट् प्रपु बहु

ये - दकार पु प्र बहु

अविद्याम् - आकार स्त्री द्वि एक

उपासते - लट् प्रपु एक

ततः - अव्ययम्

भूयः - अव्ययम्

इव - अव्ययम्

ते - दकार पु प्र बहु

तमः - सकार नपु द्वि एक

ये - दकार पु प्र बहु

विद्यायां - आकार स्त्री द्वि एक

रताः - आकार स्त्री द्वि बहु

Downloaded from **www.omkaravidya.com**

**पदार्थः**

अन्धं - अदर्शनात्मकम्

तमः - तमः

प्रविशन्ति - यान्ति

ये - ये जनाः

अविद्याम् - कर्म

उपासते - सेवते

ततः - तस्मात्

भूयः - भूयः

इव - इव

ते - ते जनाः

तमः - तमः

विद्यायां - उपासनायां

रताः - अभिरताः

**अन्वयः**

ये अविद्याम् (कर्म) उपासते (ते) अन्धं तमः प्रविशन्ति । ये उ विद्यायां

(उपासनायां) रताः ते ततः भूयः इव तमः (प्रविशन्ति) ।

**व्याकरणम्**

सन्धिः

Downloaded from **www.omkaravidya.com**

ततः + भूय - विसर्गउकारः

भूयः + इव - विसर्गलोपः

ये + उ - यान्तवान्तादेशसन्धिः

अन्यदेवाहुर्विद्यया अन्यदाहुरविद्यया ।

इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥१०॥

पदविभागः

अन्यत् एव आहुः विद्यया अन्यत् आहुः अविद्यया इति शुश्रुम धीराणां ये नः तत्

विचचक्षिरे

पदपरिचयः

अन्यत् - अव्ययम्

एव - अव्ययम्

आहुः - अह् धातोः लिट् प्रपु बहु

विद्यया - आकार स्त्री तृ एक

अन्यत् - अव्ययम्

आहुः - अह् धातोः लिट् प्रपु बहु

अविद्यया - आकार स्त्री तृ एक

इति - अव्ययम्

शुश्रुम - श्रु धातोः लिट् उपु बहु

Downloaded from **www.omkaravidya.com**

धीराणां - अकार पु ष बहु

ये - दकार पु प्र बहु

नः - दकार पुच बहु

तत् - दकार नपु प्र एक

विचचक्षिरे - वि+ चक्षु धातोः लिट् लकारः प्रपु बहु

पदार्थः

अन्यत् - पृथक्

एव - एव

आहुः - वदन्ति

विद्यया - उपासनया

अन्यत् - पृथक्

आहुः - वदन्ति

अविद्यया - कर्मणा

इति - एवम्

शुश्रुम - श्रुतवन्तः

धीराणां - धीमताम्

ये - आचार्याः

नः - अस्मभ्यम्

तत् - तत्

विचचक्षिरे - व्याख्यातवन्तः

Downloaded from **www.omkaravidya.com**

## अन्वयः

विद्यया अन्यत् एव (फलम्) आहुः । अविद्यया अन्यत् (फलम्) आहुः इति नः ये तत्

विचचक्षिरे (तेषां) धीराणां (वचनम्) शुश्रुम ।

## व्याकरणम्

सन्धिः

अन्यत् + एव - जश्त्वसन्धिः

एव + आहुः - सवर्णदीर्घसन्धिः

आहुः + आविद्यया - विसर्गरेफः

अन्यत् + आहुः - जश्त्वसन्धिः

आहुः + अविद्यया - विसर्गरफः

नः + तत् - विसर्गसकारः

तत् + विचचक्षिरे - जशत्वसन्धिः

विद्यां चाविद्यां च यस्तद्वेदोभयं सह ।

अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते ॥११॥

## पदविभागः

विद्यां च अविद्यां च यः तत् वेद उभयं सह अविद्यया मृत्युं तीर्त्वा विद्यया अमृतम् अश्नुते

## पदपरिचयः

विद्यां - आकार स्त्री द्वि एक

Downloaded from **www.omkaravidya.com**

च - अव्ययम्

अविद्यां - आकार स्त्री द्वि एक

च - अव्ययम्

यः- दकार पु प्र एक

तत् - दकार नपु प्र एक

वेद - लट् प्रपु एक

उभयं - अकार पु द्वि एक

सह - अव्ययम्

अविद्यया - आकार स्त्री तृ एक

मृत्युं - उकार पु द्वि एक

तीर्त्वा - क्त्वान्तम्

विद्यया - आकार स्त्री तृ एक

अमृतम् - अकार नपु द्वि एक

अश्नुते - लट् प्रपु एक

पदार्थः

विद्यां - उपासनाम्

च - च

अविद्यां - कर्म

च - च

यः- यः नरः

Downloaded from **www.omkaravidya.com**

तत् - तत्

वेद - आचरति

उभयं - द्वयम्

सह - सह

अविद्यया - कर्मण

मृत्युं - मरणम्

तीर्त्वा - तीर्त्वा

विद्यया -उपासनया

अमृतम् - देवतास्वरूपम्

अश्नुते - प्राप्नुते

## अन्वयः

यः विद्यां च अविद्यां च तत् उभयं सह वेद अविद्यया मृत्युं तीर्त्वा विद्यया अमृतम् अश्नुते

## व्याकरणम्

सन्धिः

च + अविद्यां - सवर्णदीर्घसन्धिः

यः + तत् - विसर्गसकारः

तत् + वेद- जश्त्वसन्धिः

वेद + उभयम् – गुणसन्धिः

Downloaded from **www.omkaravidya.com**

विद्यया - अमृतम् - सवर्णदीर्घसन्धिः

अन्धं तमः प्रविशन्ति ये सम्भूतिमुपासते ।

ततो भूय इव ते तमो य उ सम्भूत्यां रताः ॥ १२

पदविभागः

अन्धं तमः प्रविशन्ति ये सम्भूतिम् उपासते ततः भूय इव ते तमः य उ सम्भूत्यां रताः

पदपरिचयः

अन्धं - अकार पु द्वि एक

तमः - सकार नपु द्वि एक

प्रविशन्ति - लट् प्रपु एक

ये - दकार पु प्र बहु

असम्भूतिम् - इकार स्त्री द्वि एक

उपासते - लट् प्रपु एक

ततः - अव्ययम्

भूयः - - अव्ययम्

इव - अव्ययम्

ते - दकार पु प्र वहु

तमः - सकार नपु द्वि एक

ये - दकार पु प्र बहु

Downloaded from **www.omkaravidya.com**

उ - अव्ययम्

सम्भूत्यां - इकार स्त्री ष बहु

रताः - अकार पु प्र बहु

**पदार्थः**

अन्धं - अन्धम्

तमः - तमः

प्रविशन्ति - प्राप्नुवन्ति

ये - ये मनुष्याः

असम्भूतिम् - प्रकृतिम्

उपासते - पूज्यते

ततः - तस्मात्

भूयः पुनः

ते - ते नराः

तमः - तमः

ये - ये नराः

सम्भूत्यां - हिरण्यगर्भ उपासनायाम्

रताः - इच्छवन्तः

**अन्वयः**

ये असम्भूतिम् (एव) उपासते अन्धं तमः प्रविशन्ति । ये उ सम्भूत्यां रताः ते

Downloaded from **www.omkaravidya.com**

ततः भूय इव ते तमः (प्रविशन्ति) ।

व्याकरणम्

सन्धिः

ये + असम्भूतिम् - पूर्वरूपसन्धिः

ततः + भूय - विसर्गउकारः

भूयः + इव - विसर्गलोपः

ये + उ - यान्तावान्तादेशसन्धिः

अन्यदेवाहुः सम्भवात् अन्यदाहुरसम्भवात् ।

इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥ १३

पदविभागः

अन्यत् एव आहुः सम्भवात् अन्यत् आहुः असम्भवात् इति शुश्रुम धीराणां ये नः तत्

विचचक्षिरे

पदपरिचयः

न्यत् - अव्ययम्

एव - अव्ययम्

आहुः - अह् धातोः लिट् प्रपु बहु

सम्भवात् - अकार पु प एक

अन्यत् - अव्ययम्

Downloaded from **www.omkaravidya.com**

आहुः - अह् धातोः लिट् प्रपु बहु

असम्भवात् - अकार पु प एक

इति अव्ययम्

शुश्रुम - श्रु धातोः लिट् उपु बहु

धीराणां - अकार पु ष बहु

ये - दकार पु प्र बहु

नः - दकार पु च बहु

तत् - दकार नपु प्र एक

विचचक्षिरे - वि+ चक्षु धातोः लिट् लकारः प्रपु बहु

पदार्थः

अन्यत् - पृथक्

एव - एव

आहुः - वदन्ति

सम्भवात् - हिरण्यगर्भ उपासनया

अन्यत् - पृथक्

आहुः - वदन्ति

असम्भवात् - प्रकृति उपासनया

इति - एवम्

शुश्रुम - श्रुतवन्तः

धीराणां - धीमताम्

Downloaded from **www.omkaravidya.com**

ये - आचार्याः

नः - अस्मभ्यम्

तत् - तत्

विचचक्षिरे - व्यख्यातवन्तः

**अन्वयः**

सम्भवात् अन्यत् एव (फलम्) आहुः । असम्भवात् अन्यत् (फलम्) आहुः इति नः ये

तत् विचचक्षिरे (तेषां) धीराणां (वचनम्) शुश्रुम ।

**व्याकरणम्**

सन्धिः

अन्यत् + एव - जश्त्वसन्धिः

एव + आहुः - सवर्णदीर्घसन्धिः

अन्यत् + आहुः - जश्त्वसन्धिः

आहुः + असम्भवात् - विसर्गरफः

नः + तत् - विसर्गसकारः

तत् + विचचक्षिरे - जश्त्वसन्धिः

संभूतिं च विनाशं च यस्तद्वेदोभयं सह ।

विनाशेन मृत्युं तीर्त्वा सम्भूत्यामृतमश्नुते ॥ १४ ॥

**पदविभागः**

Downloaded from **www.omkaravidya.com**

संभूतिं च विनाशं च यः तत् वेद उभयं सह विनाशेन मृत्युं तीर्त्वा सम्भूत्या अमृतम्

अश्नुते

**पदपरिचयः**

संभूतिं - इकार स्त्री द्वि एक

च - अव्ययम्

विनाशं - अकार पु द्वि एक

च- अव्ययम्

यः - दकार पु प्र एक

तत् - दकार नपु प्र एक

वेद - लट् प्रपु एक

उभयं - आकार नपु द्वि एक

सह - अव्ययम्

विनाशेन - अकार पु तृ एक

मृत्युं - उकार पु द्वि एक

तीर्त्वा - क्त्वान्तम्

सम्भूत्या - इकार स्त्री तृ एक

अमृतम् - अकार नपु द्वि एक

अश्नुते - लट् प्रपु एक

पदार्थः

Downloaded from **www.omkaravidya.com**

संभूतिं - प्रकृति उपासनाम्

च - च

विनाशं - हिरण्यगर्भ-उपासनाम्

च-च

यः - यः नरः

तत् - तत्

वेद - आचरति

उभयं - द्वयम्

सह - सह

विनाशेन - ह्मिरण्यगर्भ - उपासनया

मृत्युं - मरणम्

तीर्त्वा - तीर्त्वा

(अ) सम्भूत्या - प्रकृति-उपासनया

अमृतम् - प्रकृतिलयक्षणम्

अश्नुते - प्राप्नुते

अन्वयः

यः (अ) संभूतिं च विनाशं च तत् उभयं सह वेद (सः) विनाशेन मृत्युं तीर्त्वा

(अ)सम्भूत्या अमृतम् अश्नुते ।

व्याकरणम्

Downloaded from **www.omkaravidya.com**

सन्धिः

यः + तत् - विसर्गसकारः

तत् + वेद - जश्त्वसन्धिः

वेद + उभयम् - गुणसन्धिः

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् ।

तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ॥१५॥

पदविभागः

हिरण्मयेन पात्रेण सत्यस्य अपिहितं मुखम् तत्त्वं पूषन् अपावृणु सत्यधर्माय दृष्टये

पदपरिचयः

हिरण्मयेन - अकार नपु तृ एक

पात्रेण - अकार नपु तृ एक

सत्यस्य - अकार नपु ष एक

अपिहितं - अकार नपु प्र एक

मुखम् - अकार नपु प्र एक

तत् - दकार नपु प्र एक

त्वं - दकार  प्र एक

पूषन् - नकार पु सं प्र

अपावृणु - अप् + आङ् + वृ धातोः लोट् मपु एक

Downloaded from **www.omkaravidya.com**

सत्यधर्माय - अकार पु च एक

दृष्टये - इकार स्त्री च एक

पदार्थः

हिरण्मयेन - ज्योतिर्मयेन

पात्रेण - पात्रेण

सत्यस्य - आदित्यमण्डलस्थस्य

अपिहितं - आच्छादितम्

मुखम् - द्वारम्

तत् - तत्

त्वं - त्वम्

पूषन् - हे सूर्यदेव

अपावृणु - अपसारय

सत्यधर्माय सत्यस्य उपासनात्

दृष्टये - दृष्टये

अन्वयः

हिरण्मयेन पात्रेण सत्यस्य मुखं अपिहितं (अस्ति) । हे पूषन् ! त्वं तत् सत्यधर्माय

(मम) दृष्टये अपावृणु ।

व्याकरणम्

सन्धिः

Downloaded from **www.omkaravidya.com**

सत्यस्य + अपिहितम् - सवर्णदीर्घसन्धिः

पूषन् + अपावृणु - ङमुडागमनसन्धिः

पूषन्नेकर्षे यम सूर्य प्राजापत्य व्यूह रश्मीन्समूह ।

तेजो यत्ते रूपं कल्याणतमं तत्ते पश्यामि योऽसावसौ पुरुषः
सोऽहमस्मि ॥ १६॥

पदविभागः

पूषन् एकर्षे यम सूर्य प्राजापत्य व्यूह रश्मून् समूह तेजः यत् ते रूपं कल्याणतमं तत् ते

पश्यामि यः असौ असौ पुरुषः सः अहम् अस्मि

पदपरिचयः

पूषन् - नकार पु  प्र

एकर्षे - इकार पु सं प्र

यम - अकार पु सं प्र

सूर्य- अकार पु सं प्र

प्राजापत्य - अकार पु सं प्र

व्यूह - वि + वह् धातोः लिट् मपु एक

रश्मीन् - इकार पु द्वि बहु

समूह - सम् + वह् धातोः लिट् मपु एक

तेजः - सकार नपु द्वि एक

यत्- दकार नपु प्र एका

Downloaded from **www.omkaravidya.com**

ते - दकार पु ष एक

रूपं - अकार नपु प्र एक

कल्याणतमं - अकार नपु प्र एक

तत् - दकार नपु प्र एक

ते -दकार पु ष एक

पश्यामि - लट् प्रपु एज

यः - दकार पु प्र एक

सः दकार पु प्र एक

असौ - सकार पु प्र एक

पुरुषः - अकार पु प्र एक

सः - दकार पु प्र एक

अहम् - दकार नि प्र एक

अस्मि - लट् लकार उपु एक

पदार्थः

पूषन् - हे रवि

एकर्षे - हे एकर्षे

यम - हे यम

सूर्य - हे सूर्य

प्राजापत्य - हे प्रजापतेः पुत्र

व्यूह - विगमय

Downloaded from **www.omkaravidya.com**

रश्मीन् - सन्न्

समूह - एकीकुरु

तेजः - ज्योतिः

यत् - यत्

ते - तव

रूपं - रूपम्

कल्याणतमं - अत्यन्तशोभनम्

तत् - तत्

ते - तव

पश्यामि - अवलोकयामि

यः - यः

सः - सः

असौ - असौ

पुरुषः - पुरुषः

सः - सः

अहम् - अहम्

अस्मि - भवामि

अन्वयः

हे पूषन् ! हे एकर्षे ! हे यम ! हे सूर्य ! हे प्राजापत्य ! रश्मीन् व्यूह । तेजः

Downloaded from **www.omkaravidya.com**

समूह । ते (तव) यत् कल्याणतमं रूपं (अस्ति) तत् ते (तव कृपया) पश्यामि । यः

असौ पुरुषः सः अहम् अस्मि ।

## व्याकरणम्

सन्धिः

पूषन् + एकर्षे - ङमुडागमनसन्धिः

तेजः + यत् - विसर्गउकारः

यः + असौ - विसर्गउकारः यान्तवान्तादेशसन्धिः

असौ + असौ - यान्तावान्तादेशसन्धिः

सः + अहम् - विसर्गउकार:

वायुरनिलममृतमथेदं भस्मान्तं शरीरम् ।

ओं क्रतो स्मर कृतं स्मर क्रतो स्मर कृतं स्मर ॥ १७॥

## पदविभागः

वायुः अनिलम् अमृतम् अथ इदं भस्मान्तं शरीरम् ओं क्रतः स्मर कृतं स्मर क्रतः स्मर

कृतं स्मर

## पदपरिचयः

वायुः - उकार पु प्र एक

अनिलम् - अकार पु द्वि एक

अमृतम् - अकार नपु द्वि एक

Downloaded from **www.omkaravidya.com**

अथ - अव्ययम्

इदं - मकार नपु प्र एक

भस्मान्तं - अकार नपु द्वि एक

शरीरम् - अकार नपु द्वि एक

ओं - अव्ययम्

क्रतः - उकार पु सं प्र एक

स्मर - लोट् मपु एक

कृतं - अकार पु द्वि एक

स्मर - लोट् मपु एक

क्रतो - उकार पु सं प्र एक

स्मर - लोट् मपु एक

कृतं - अकार पु द्वि एक

स्मर - लोट् मपु एक

पदार्थः

वायुः - प्राणः

अनिलम् - वायुम्

अमृतम् - अमृतम्

अथ - ततः

इदं - एतत्

भस्मान्तं - भस्मावशेषम्

Downloaded from **www.omkaravidya.com**

शरीरम् - देहम्

ओं - ओम्

क्रतो - सङ्कल्पात्मक

स्मर - चिन्तय

कृतं - कृतम्

स्मर - स्मर

क्रतो - सङ्कल्पात्मक

स्मर - स्मर

कृतं - कृतम्

स्मर - समर

## अन्वयः

वायुः अमृतम् अनिलम् (भवतु) । अथ इदं शरीरम् भस्मान्तं (भवतु) ।

ओं क्रतो स्मर कृतं स्मर क्रतो स्मर कृतं स्मर ।

## व्याकरणम्

सन्धिः

वायुः + अनिलम् - विसर्गरफः

अथ + इदम् - गुणसन्धिः

अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान् ।

Downloaded from **www.omkaravidya.com**

युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम ॥१८॥

पदविभागः

अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् युयोधि अस्मत् जुहुराणम्

एनः भूयिष्ठां ते नमः उक्तिं विधेम

पदपरिचयः

अग्ने - इकार पु सं प्र

नय - लोट् मपु एक

सुपथा - आकार स्त्री प्र एक

राये - ऐकार पय च एक

अस्मान् - दकार  द्वि बहु

विश्वानि - अकार नपु प्र बहु

देव - अकार पु सं प्र एक

वयुनानि - अकार नपु प्र बहु

विद्वान् - तकार पु प्र एक

युयोधि - यु धातोः लोट् मपु एक

अस्मत् - दकार पु प एक

जुहुराणम् - अकार नपु प्र एक

एनः - अकार पु प्र एक

भूयिष्ठां - अकार स्त्री द्वि एक

Downloaded from **www.omkaravidya.com**

ते - दकार नि ष एक

नमः - अव्ययम्

उक्तिं - इकार स्त्री द्वि एक

विधेम - विध् धातोः विधि उ बहु

पदार्थः

अग्ने - हे अग्निदेव

नय - गमय

सुपथा - शोभनेन मार्गेण

राये - धनाय

अस्मान् - नः

विश्वानि - सर्वाणि

देव - हे देव !

वयुनानि - कर्माणि

विद्वान् - पण्डितः

युयोधि - वियोजय

अस्मत् - अस्मत्

जुहुराणम् - कुटिलम्

एनः - पापम्

भूयिष्ठां - बहुतराम्

ते - तुभ्यम्

Downloaded from **www.omkaravidya.com**

नमः - नमः

उक्तिं - वचनम

विधेम - समर्पयामः

## अन्वयः

हे अग्ने ! अस्मान् राये सुपथा नय । हे देव ! विश्वानि वयुनानि विद्वान् (त्वम्) अस्मत्

जुहुराणम् एनः युयोधि । ते भूयिष्ठां नमः उक्तिं विधेम ।

## व्याकरणम्

सन्धिः

युयोधि + अस्मत् - यण्सन्धिः

अस्मत् + जुहुराणम् - श्चुत्वसन्धिः जश्त्वसन्धिः

Downloaded from **www.omkaravidya.com**